ARYAVART SHODH VIKASH PATRIKA
RNI TITLED NO. UPBBIL04292
RNI REG. NO. UPBBIL/2014/66218 PP. NO.- 310-312
ISSN NO.-2347-2944
Vol.-7, No.-I, Issues-VIII YEAR- June-2017

# संस्कृत रूपकेषु विदूषकस्य भूमिका

**डॉ0 चन्देश कुमार पाण्डेय**
सह–आचार्यः संस्कृत विभागे, महाविद्यालय भटवली बाजार, उनवल, गोरक्षपुरम (उ0प्र0) भारत

***संस्कृत नाटकेषु रूपकेषु वा कथावस्तु–प्रसंगे विदूषकस्य महती भूमिका अस्ति। तस्य सन्निवेशः मुख्य नायकस्य सहायक रूपेण भवति। विदूषकस्य भूमिका एतेषु रूपकेषु प्रायः हास्यकरः एव। विदूषकस्य प्रयोगः संस्कृत नाटकेषु प्राचुर्येण संप्राप्नोति। सः प्रधाननायकस्य लक्ष्यप्राप्तिप्रयासे पदे पदे विविधेषु रूपेषु साहाय्यं करोति। विदूषकः एकस्मिन् स्थाने हास्यविनोदजलनिधौ सहृदयानां मनांसि निमज्जयति तत्रैव प्रणयरतयोः नायिकानायकयोः संगमे सहायकोऽपि भवति शृंगारप्रधान–नाटकेषु।***

***शूद्रकस्य प्रसिद्धेः कारणं मृच्छकटिक–प्रकरणमस्ति, यत्र विदूषकस्य श्लाघ्या भूमिकास्ति। प्रकरणाय विदूषकस्य महत्त्वं अभिनव गुप्तः न स्वीकरोति, तेन विमर्शितमपि– "कंचुकि –स्थाने दासः विदूषक स्थाने विटः अमात्यस्थाने श्रेष्ठीत्यर्थः।"[1] रूपकेषु द्वयोः पात्रयोः भिन्ना भिन्ना उपयोगिता विद्यते। एकस्मिन् स्थाने विटविदूषकौ मृच्छकटिकप्रकरणे दृश्येते एव। तत्र विदूषकः नायकानुगामी विटश्च प्रायः वारांगनानुवर्ती दृश्यते। विविधैः प्रमाणैः इदं स्पष्टं यत् जनानां चित्तानुरञ्जनाय विनोदप्रसंगैः संस्कृतरूपकेषु विदूषकस्य प्रादुर्भावः भवति। दशरूपके आचार्य धनञ्जयेन कथितम् –***

"एक विद्यो विटश्चान्यो हास्यकृच्च विदूषकः।"[2]

साहित्यदर्पणकारोऽपि कथयति–

"कुसुम वसन्ताद्यभिदः कामवपुर्वेषभाषाद्यैः। हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः।।"[3]

भासमहाकविना स्वरचितनाटकेषु मनोरञ्जनाय विदूषकं प्रयुज्य तस्यास्तित्वं प्रमाणीकृतम्। यथा– अविमारके, स्वप्नवासवदत्ते, चारुदत्ते च विदूषकः प्रायः भोजनप्रियः, मोदकप्रियः, नायक सहायकः, हास्यकरः जात्या ब्राह्मणश्चास्ति। प्रतिज्ञायौगन्धरायणे विदूषकस्य मोदकप्रियता दृश्यते– "भो देवकुलपीठिकायां मोदकमल्लकं न प्रेक्षे।"[4]

अविमारकेऽपि विदूषकः भोजनप्राप्त्याशया वञ्चितः लक्ष्यते। विदूषकः कथयति– ''चन्द्रिके! कुत्र चन्द्रिका। हा वञ्चितोऽस्मि। गण्डभेददास्या शीलं जानन्त्याप्यात्मनो भोजन विश्रम्भेण छलितोऽस्मि।"[5] स्वप्नवासवदत्ते वर्णितः विदूषकः भोजनप्राप्तौ चिन्तामग्न दृश्यते तावदेव अन्तःपुरे निवर्तमानस्य राज्ञः उदयनस्य विषये चिन्तयति कथयति च–"इदानीं प्रासादेषूष्यते, अन्तःपुरदीर्घिकासु स्नायते, प्रकृतिमधुर सुकुमाराणि मोदकखाद्यानि खाद्यन्त, इत्यनप्सरस्संवास उत्तरकुरुवासो मयानुभूयते।"[6] भासनाटकेषु विदूषकः प्रकृत्या मूर्खः इव निरुपितः।

मूर्खतापूर्ण–कार्यैः वचनैः च सः हास्योत्पत्तिं करोति। एकस्मिन् प्रसंगे अविभारक नाटके चेट्या 'त्वं किलावैदिकः' इति भणिते विदूषकः स्वज्ञानराशिं प्रकटयति कथयति च–"कस्मादहमवैदिकः। श्रृणु तावत्। अस्ति रामायण नाम नाट्यशास्त्रम्। अस्मिन् पंचश्लोकाः असंपूर्णे संवत्सरे मया पठिता।"[7] विदूषकस्य मूर्खता दर्शनीयास्ति स्वप्नवासवदत्ते नाटके। कथायाः प्रसंगे विदूषकः कथयति – "भवतु अन्यां कथयिष्यामि। अस्ति नगरं ब्रह्मदत्त नाम। तत्र किल राजा काम्पिल्यो नाम।"[8] अत्र विपर्ययो विद्यते, नगर स्थाने राजा तथा राज–स्थाने नगरं प्रयुङ्क्ते।

संस्कृत रूपकेषु विदूषकस्य या भूमिका दर्शिता, तस्यां भूमिकायां कालिदासस्य संपूर्णेषु नाटकेषु विदूषकः हास्यकरः एव दृश्यते। कालिदासस्य माधव्य नाम विदूषकः आलस्यकरः भीरुः मूर्खः भोजनप्रियः द्विजः एव अस्ति। अभिज्ञानशाकुन्तले नाटके द्वितीयांके सर्वप्रथमं विदूषकस्य प्रादुर्भावः भवति। तत्र सः आत्मभीरुतां, अकर्मण्यतां भोजनप्रियतां च संपूर्ण आनन्देन सह प्रतिपादयति– "एतस्य मृगयाशीलस्य राज्ञः वयस्य भावेन निर्विण्णोऽस्मि। अयं मृगोऽयं वराहोऽयं शार्दूल इति मध्याह्नेऽपि ग्रीष्म विरलपादपच्छायासु वनराजिष्वाहिण्ड्यते ऽटवीतोऽटवी। पत्रशंकरकषायाणि कदुष्णानि जलानि पीयन्ते। अनियतवेलं शूल्यमांसभूयिष्ठ आहारो भुज्यते।"[9] पुनः राज्ञा – "विश्रान्तेन भवता ममाप्येकस्मिन्नायासे कर्मणि सहायेन भवितव्यम्", इति कथिते, विदूषकः कथयति – "किं मोदकखादिकायाम्। तेन ह्ययं सुगृहीतः क्षणः।"[10] अभिज्ञानशाकुन्तलस्य विदूषकः स्वसरलहृदयवृत्तिना मूर्खत्वेन प्रकाशितः। दुष्यन्तः तस्य सरल भावं ज्ञाप्य विदूषकस्य मूर्खतया शंकितः भूत्वा स्वप्रणयप्रसंगं गोपयितुं विदूषकं ब्रूते– राजा – "(स्वगतं) चपलोऽयं बटुः। कदाचिदस्मत्प्रार्थनामन्तः पुरेभ्यः कथयेत्। भवतु। एनमेवं वक्ष्ये।" पुनः "परिहासविजल्पितं सखे

ASVS Society Reg. No. 561/2013-14

अनुरूपी लेखक

ISSN NO.-2347-2944
Vol.-7, No.-I, Issues-VIII YEAR- June-2017

परमार्थेन न गृहयतां वचः।"[11] अभिज्ञानशाकुन्तले विदूषकः वस्तुनः विकासाय अपि अवसरं ददाति। द्वितीयेऽङ्के मातुः सन्देशं प्राप्य दुष्यन्तः उपवासव्रतपारणोत्सवे स्वस्थाने विदूषकं प्रेषयति। अनेन प्रकारेण शकुन्तलाविषयकप्रणयप्रसंगे पर्याप्तावसरः संमिलति।

नाटककारेण हर्षेण स्वस्मिन् नागानन्दनाटके विदूषकं स्थाप्य शास्त्रीय नाट्यतत्त्वं स्वीकृतम्। अत्र 'अत्रेय' इति नाम्नः विदूषकः पूर्ववर्तिनाम् विदूषकाणां चरित्रलक्षणं अनुकरोति। प्रथम द्वितीययोः अंकयोः विदूषकः सार्थकवार्तालापैः शिष्टः दृश्यते। यथा– "भो वयस्य, प्रेक्षस्व, प्रेक्षस्व। एतत् खलु सविशेषघन स्निग्धपादपोपशोभितं सुरभिहविर्गन्धगर्भितोद्दामधूमनिर्गमम्, अनुद्विग्नसुखनिषण्णश्वापदगणं तपोवनमिव लक्ष्यते।"[12] अस्मिन् स्थाने विदूषकस्य तर्कः श्लाघनीयः वर्तते। पुनः च नायिकायाः साक्षात्कारावसरे भीतां नायिकां विदूषकः– "भवति! किमत्र युष्माकं तपोवने इदृशः आचारः येनातिथिरागतो वाङ्मात्रेणापि न सम्भाव्यते।"[13] इति कथयन् तपोवनस्य आचारं शिक्षयति।

नागानन्द नाटके विदूषकः यत्र तत्र यद्यपि प्रज्ञावानिव प्रतीयते तथापि क्वचिद् भोजनप्रियः मूर्खश्च अवलोक्यते। प्रथमांके विदूषकः नायकं प्रति कथयति– "भो दृष्टं त्वया प्रेक्षितव्यम्। तदिदानीं मध्याह्ने सूर्य–किरण–सन्ताप–द्विगुणित इव मे उदराग्निः िमधमायते। तदेव निष्क्रामावः। येन ब्राह्मणोऽतिथिर्भूत्वा मुनिजनसकाशाल्लब्धैः कन्दमूलफलैरपि यावत् प्राणधारणं करोमि।"[14] अस्मिन् सन्दर्भे विदूषकस्य भोजनासक्तिः नितरां आलक्ष्यते।

शूद्रकस्य मृच्छकटिक–नाम्नि प्रकरणे मैत्रेयनाम विदूषकः जात्या ब्राह्मणोऽस्ति, यः चारुदत्तनाम्नः नायकस्य विपन्नावस्थासु संकटापन्नस्थितिषु वा सर्वदा सहायक रूपेण दरीदृश्यते। तस्मिन्नागते तस्य प्रशंसायाम् चारुदत्तः मैत्रेय–विषये कथयति– "अये सर्वकाल मित्रं मैत्रेयः प्राप्तः। सखे स्वागतम्। आस्यताम्।"[15] अस्मिन् प्रकरणे (रूपके) विदूषकः केवलं हास्यकरः नास्ति अपितु किञ्चिद् वैशिष्ट्याद् सामान्यविदूषकेषु भिन्नः इव प्रतिभाति। चारुदत्तस्य दरिद्रतां दृष्टवा विदूषकः देवपूजन विषये कथयति– "यत् एवं पूज्यमाना अपि देवता न ते प्रसीदन्ति। तत्को गुणो देवेष्वर्चितेषु।"[16] चारुदत्तस्य सम्पत्तौ विदूषकः ससुखेन निवसति किन्तु विपत्तौ प्राप्तौ स इतस्ततः परिभ्रमन् उदरपूर्तिं कृत्वा रात्रौ चारुदत्तस्य पार्श्वे शयितुं मात्रं आगच्छति। यथा विदूषकः कथयति– "अथवा मयापि मैत्रेयेण परस्यामन्त्रणकानि समीहितव्यानि। हा अवस्थे, तुलयसि। यो नामाहं तत्रभवतश्चारुदत्तस्य ऋद्ध्याहोरातं प्रयत्नसिद्धैरुद्गारसुरभिगन्धिभिर्मोदकैरेवाशितोऽभ्यन्तरचतुः शालकद्वार उपविष्टो मल्लकशतपरिवृतश्चित्रकर इवांगुलीभिः स्पृष्ट्वा स्पृष्टापनयामि। नगर चत्वर वृषभ इव रोमन्थायमान तिष्ठामि। स इदानीमहं तस्य दरिद्रतया यत्र तत्र चरित्वा गृहपारावत इवासननिमित्तमत्रागच्छामि।"[17] चारुदत्तस्य अभ्युत्थानाय विदूषकः प्रयत्नशीलः इव आभाति। यथा–

"शकारः – हरे! हस हस।

विदूषकः – हसिष्यामि।

शकारः – कदा।

विदूषकः – पुनरपि ऋद्धयार्यचारुदत्तस्य।"[18]

सः चारुदत्तस्य किञ्चिदपि न हानिमिच्छति। चौरहस्तगते सुवर्णभाण्डे चारुदत्तेन वसन्तसेनायै अर्पिता रत्नावली विदूषकाय न रोचते। स चारुदत्तं वदति– "मा तावदखादितस्याभुक्तस्याल्पमूल्यस्य चौरेणापहृतस्य कारणाच्चतुःसमुद्रसारभूता रत्नावली दीयते।"[19] विदूषकः आदर्शमित्रमिव वसन्तसेनायाः संसर्गाद् चारुदत्तं दूरीकर्त्तुमिच्छति। सः चारुदत्तेवदति–"तदहं ब्राह्मणो भूत्वेदानीं भवन्तं शीर्षेण पतित्वा विज्ञापयामि – नियर्त्यतामात्मास्माद् गणिका प्रसंगाद्।"[20] विदूषकः चारुदत्तस्य अभिन्नमित्रमास्ति। सः चारुदत्ते मृत्युदण्डप्राप्ते जीवनं धर्तुं न इच्छति, कथयति च– "तथापि न शक्नोमि प्रिय वयस्यरहितः प्राणान् धर्तुमिति। तद् ब्राह्मण्यैदारकं समर्प्य प्राणपरित्यागेनात्मनः प्रियवयस्यमनुगमिष्यामि,"[21] विदूषकस्य सौहृदं प्रशंसनीयमनुकरणीयञ्च वर्ततेऽस्मिन्नवसरे।

विदूषकः स्वभावेन क्रोधी अपि अस्ति। शकारेण रदनिकायाः केशषर्पण प्रसंगे सः मन्युं कृत्वा शकारं हन्तुमुद्यतः भवति। यथा– "मा तावत्। भोः स्वके गृहे कुक्कुरोऽपि तावच्चण्डो भवति। किं पुनरहं ब्राह्मणः। तदेतेनास्मादृशजनभागधेयकुटिलेन दण्डकाष्ठेन दुष्टस्येव शुष्कवेणुकस्य मस्तकं ते प्रहारैः कुट्टयिष्यामि।"[22] अस्मिन् प्रकरणेऽपि विदूषकः स्वभावेन भोजनप्रियः दृश्यते। वसन्तसेनायाः भवने पच्यमानानि व्यञ्जनानि दृष्ट्वा सः मनसि चिन्तयति– "अधिकमुत्सुकायते मां साध्यमान बहुविध िभक्ष्यभोजनगन्धः।.........बहुविधाहारविकारमुपसाधयति सूपकारः। बध्यन्ते मोदकाः, पच्यन्तेऽपूपकाः। अपीदानीमिह वर्धितं भुङ्क्ष्व इति पादोदकं लप्स्ये।"[23] सः वसन्तसेनायाः गृहं यदा रत्नावलीं दातुं गच्छति तदा वसन्तसेना मिष्टान्नैः भौदकैश्च विना केवलं शब्देनैव सत्कृत्य विसर्जति। अतः रुष्टः विदूषकः कथयति– "अतो गणिकाया लोभोऽदक्षिणता च। यतो न कथापि कृतान्या। अनेकधा स्नेहानुसारं भणित्वा किमपि, एवमेव गृहीता रत्नावली। एतावत्या ऋद्ध्या न तयाहं भणितः – 'आर्य मैत्रेय, विश्रम्यताम्।

ASVS Society Reg. No. 561/2013-14

मल्लकेन पानीयमपि पीत्वा गम्यताम्' इति।"[24] अत्र विदूषकस्य भोजन प्रियतायाः दर्शनं भवति।

रूपकेषु अनेकेषु उदाहरणेषु इदं स्पष्टं यत् विदूषकः मूर्खः भोजनप्रियः हास्यकरः च भवति किन्तु मृच्छकटिके सः पदे पदे नायकस्य मित्रत्वेन साहाय्यं करोति इति विलक्षणं लक्षणम्।

## सन्दर्भ ग्रन्थ सूची

1. अभिनव भारती, भाग 2, पृ. 431.
2. दशरूपकम्, द्वितीयः प्रकाशः
3. साहित्यदर्पणम्–3.
4. प्रतिज्ञायौगन्धरायणम् – भासनाटकचक्रम् – भाग 2; चौखम्भा सीरीज 3, पृ. 72–73, वाराणसी।
5. अविमारक –2, पृ. 31.
6. स्वप्नवासवदत्तम्–4, पृ. 98.
7. अविमारक–2, पृ. 28.
8. स्वप्नवासवदत्तम्–5, पृ. 181.
9. अभिज्ञानशाकुन्तलम्–2, पृ. 90; प्रणेता – डॉ. कपिलदेव द्विवेदी आचार्य; प्रकाशक– साहित्य संस्थान, 4, मोतीलाल नेहरू रोड, इलाहाबाद, 211002, सन् 1980.
10. तत्रैव, पृ. 101.
11. तत्रैव, अंक 3, पृ. 132.
12. नागानन्दम्–1, पृ.19.
13. तत्रैव–1, पृ. 36.
14. तत्रैव–1, पृ. 42.
15. श्री शूद्रक विरचितम् मृच्छकटिकम् – प्रथमोऽङ्कः पृ. 16; व्याख्याकार– डॉ. श्रीनिवास शास्त्री, साहित्य भण्डार, सुभाष बाजार, मेरठ–2.
16. तत्रैव–1, पृ. 20.
17. तत्रैव–1, पृ. 14.
18. तत्रैव–1, पृ. 53.
19. तत्रैव–3, पृ. 138.
20. तत्रैव–4, पृ. 188.
21. तत्रैव–10, पृ. 408.
22. तत्रैव–1, पृ. 44.
23. तत्रैव–4, पृ. 176.
24. तत्रैव–5, पृ. 194.

*****

ASVS Society Reg. No. 561/2013-14